International Journal of Sanskrit Research 2022; 8(1): 04-07

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2022; 8(1): 04-07
© 2022 IJSR
www.anantaajournal.com
Received: 04-11-2021
Accepted: 06-12-2021

**स्वामी संवर्धक शर्मा**
शोधच्छात्रः, शा. संस्कृत महाविद्यालयः रायपुरम्, छत्तीसगढम्, भारत

**Corresponding Author:**
**स्वामी संवर्धक शर्मा**
शोधच्छात्रः, शा. संस्कृत महाविद्यालयः रायपुरम्, छत्तीसगढम्, भारत

# भगवद्गीतासु भक्तिदर्शनम्

**स्वामी संवर्धक शर्मा**

## प्रस्तावना

उपनिषदां सारभूता भगवद्गीता मुक्तिविधायिनी गङ्गोत्रीवद् वर्तते । तस्मादुच्यते मनस्विभि –

गीता सुगीता कर्तव्या किमन्यैः शास्त्रविस्तरैः । [1]

शंकराचार्येणापि उक्तं यथा –

"इदं गीताशास्त्रं समस्तवेदार्थसारसंग्रहभूतं दुर्विज्ञेयार्थम् ।" [2]

भगवद्गीतायां निःश्रेयसमुद्दिश्य भगवता श्रीकृष्णेन ज्ञानभक्तिकर्मयोगादीनां विविधसाधनानां वर्णनं कृतम् । तस्मात् रुचिवैचित्र्याद् ग्राहकत्वभेदाच्च केचन विद्वांसः कर्मणः प्राधान्यमङ्गीकुर्वन्ति, एके ज्ञानस्य, केचिद् योगस्य, अन्ये केचन भक्तेरेव च । वस्तुतः अर्जुनमुपदिशन् भगवान् श्रीकृष्णः प्रसङ्गवशाद् एकैकशः कर्मादिकं सर्वं शंसति । यथा स कर्म स्तुवन् ब्रवीति –

संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ ।
तयोस्तु कर्मसंन्यासात् कर्मयोगो विशिष्यते ।। [3]

तथैवान्यत्र स योगं तपसः ज्ञानात् कर्मणश्च विशिष्टतरं मन्यते –

तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः ।
कर्मिभ्यश्चाधिको योगी तस्माद् योगी भवार्जुन ।। [4]

परञ्च तत्रैव योगिष्वपि भजमानं भक्तं सर्वश्रेष्ठं स्वीकरोति –

योगिनामपि सर्वेषां मद्गतेनान्तरात्मना ।
श्रद्धावान् भजते यो मां स मे युक्ततमो मतः ।। [5]

चतुर्विधभक्तेषु[6] ज्ञानिनं सर्वप्रियमुद्घोषयति सः –

प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः ।। [7]

परञ्च तत्रापि ज्ञानिनः कृते एकभक्तिरिति विशेषणं व्याहृत्य स भक्तिपक्षमेव समर्थयति –

तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते । [8]

पुनश्च स एकतो "ज्ञानिनमात्मानमिति"[9] सूचयति चेदपरतश्च "ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम्।"[10] इति वाचा भक्तादभिन्नतां प्रतिपादयति ।
नित्यभक्तो महर्षिनारदः कर्मज्ञानयोगेभ्योऽपि भक्तिं श्रेयसीं स्वीकरोति –

सा तु कर्मज्ञानयोगेभ्योऽप्यधिकतरा ।[11]

अद्वैतवादी ज्ञानी शंकराचार्योऽपि मुक्तिहेतुषु भक्तिमेव गरीयसीमङ्गीकरोति –

मोक्षकारणसामग्र्यां भक्तिरेव गरीयसी । [12]

भगवद्गीतानुशीलनात् प्रतीयते यत् श्रीकृष्णस्यापि भक्तिः प्रियतमा मता । उपदेशक्रमे भगवान् श्रीकृष्णोऽनेकत्र अन्यसाधनापेक्षया बहुवारं भक्तिमहिमानमद्धरन् ब्रवीति यद् यो जनो भक्त्या मां सेवते, स ब्रह्मावाप्नोति –

मां च योऽव्यभिचारेण भक्तियोगेन सेवते ।
स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते ।। [13]

मयि दत्तचित्तप्राणाः ये ज्ञानिनो महात्मानः परस्परं ममैव चर्चां कुर्वन्तो प्रमुदिता भवन्ति, तेषां प्रीत्या मम भजनं कुर्वतां अहं तादृशीं बुद्धिं प्रयच्छामि यया बुद्ध्या ते मां प्राप्नुवन्ति । तादृशान् भक्तान् अनुग्रहीतुमहं आत्मस्थः सन् भासमानेन दीपकेन अज्ञानजनितमन्धकारं विनाशयामि -
अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते ।

इति मत्वा भजन्ते मां बुधा भावसमन्विताः ।।
मच्चित्ता मद्गतप्राणा बोधयन्तः परस्परम् ।
कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च ।।
तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् ।
ददामि बुद्धियोगं तं येन मामुपयान्ति ते ।।
तेषामेवानुकम्पार्थमहमज्ञानजं तमः ।
नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ।। [14]

यः कश्चिदपि भक्तिपूर्वकं मह्यं पत्रं पुष्पं फलं जलं वा अर्पयति, तत् सर्वं भावसमर्पितं वस्त्वहं गृह्णामि –

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ।। [15]

यो भक्तोऽनन्येन चेतसा मां निरन्तरं स्मरति तस्य कृतेऽहं सुलभो भवामि –

अनन्यचेताः सततं यो मां स्मरति नित्यशः ।
तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगिनः ।। [16]

ये अनन्याः पुरुषाः मम चिन्तनं कुर्वन्तः उपासनारता भवन्ति, तेषां योगक्षेमस्य वहनमहमेव करोमि –

अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते ।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ।। [17]

"अन्याश्रयाणां त्यागोऽनन्यता ।" [18] एषाऽनन्यतैव श्रीकृष्णस्यातिप्रियः । तस्माद् अतिदुराचारी पापी जनोऽपि अनन्यतया भगवन्तं श्रीकृष्णं समुपास्य भक्तिबलात् शीघ्रमेव धर्मात्मा भवति, यतो हि नैव भगवद्भक्तो विनश्यति –

अपि चेत् सुदुराचारो भजते मामनन्यभाक् ।
साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः ।।
क्षिप्रं भवति धर्मात्मा शश्वच्छान्तिं निगच्छति ।
कौन्तेय प्रति जानीहि न मे भक्तः प्रणश्यति ।। [19]

अर्जुनाय स्वकीयमैश्वरं रूपं दर्शयित्वा ब्रवीति भगवान् श्रीकृष्णः सुस्पष्टं यद् वेदादिसाधनैः कैश्चिद् एवंप्रकारः नैव वीक्षितुं शक्यः, अपि तु केवलमनन्यभक्त्यैव तत्त्वतो ज्ञातुं द्रष्टुं प्रवेष्टुं च शक्योऽस्मि –

नाहं वेदैर्न तपसा न दानेन न चेज्यया ।
शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा ।।
भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन ।
ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तप ।। [20]

भागवतपुराणेऽपि श्रीकृष्ण उद्धवमेवंविधमेव वचनं वदति यद् धर्मो योगः सांख्यं स्वाध्यायः तपः त्यागो वा तथा न मां साधयति, यथा भक्तिः । एकया भक्त्यैवाहं ग्रहीतुं शक्यः –

न साधयति मां योगो न सांख्यं धर्म उद्धव ।
न स्वाध्यायस्तपस्त्यागो यथा भक्तिर्ममोर्जिता ।।
भक्त्याहमेकया ग्राह्यः श्रद्धयात्मा प्रियः सताम् । [21]
महर्षिणा नारदेन परमेश्वरे परमप्रेमरूपा [22]
भक्तिरस्ति शाणडिल्यमते च
परानुरक्तिर्भक्तिरिति। [23]

सैव परमप्रेमरूपाऽनन्या भक्तिः भगवतः श्रीकृष्णस्येष्टमस्ति। उपदेशप्रसङ्गे द्वादशेऽध्याये "अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च" इति त्रयोदशतमात् श्लोकादारभ्य "भक्तिमान् मे प्रियो नरः" इति एकोनविंशतितमपर्यन्तं स्वप्रियभक्तानामुपलभ्यान् गुणानपि उद्धरति । ज्ञानवादी भाष्यकारः शंकराचार्योऽपि अत्र भक्तिमहत्त्वं स्वीकुर्वन वदति –

"प्रियो हि ज्ञानिनोऽत्यर्थम् इति यत् सूचितं तद् व्याख्याय इह उपसंहृतं भक्ताः ते अतीव मे प्रिया इति ।"[24]

अर्जुनायोपदिशन् स कथयति यद् मम भक्तो भव, मय्येव मनो बुद्धिं च निवेशय, मय्येव आत्मानं संयोजय । एवं मत्परायणो भूत्वा त्वं मामेव प्राप्स्यसि –

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।
मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः ।। [25]

भागवतपुराणे नवधा[26] भक्तिरुक्तास्ति, परञ्चात्मनिवेदनं भगवतः श्रीकृष्णस्यातिप्रियं यस्माद् उपदेशमुपसंहरत् स सखाभूतम्[27] अर्जुनं शरणागतिरूपां भक्तिं परामृशति यत् त्वं सर्वधर्मान् त्यक्त्वा ममैव शरणमात्रं स्वीकुरु, अहं त्वां सर्वपापेभ्यः विमुक्तं करिष्यामि -

सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज ।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ।। [28]

प्रायशो वक्ता स्वकीयनिर्णयात्मकेन मतेन वक्तव्यं समाप्नोति। भगवता कृष्णेन च यथा निष्कर्षतोऽर्जुनः शरणागतिरुपदिश्यते, तेन विविधेषु साधनेषु भक्तिरेव तस्य सुनिश्चितं मतम् ।

**सन्दर्भग्रन्थसूची**

1. भगवद्गीता - माहात्म्यम्.4
2. तदेव - शांकरभाष्य, पृ.14
3. तदेव - 5.2
4. तदेव - 6.46
5. तदेव - 6.47
6. तदेव - चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन । आर्तो जिज्ञासुर्थार्थी ज्ञानी च भरतर्षभ ।। 7.16
7. तदेव - 7.17
8. तदेव - 7.17
9. तदेव - ज्ञानी त्वात्मैव मे मतम् । 7.18
10. तदेव - 9.29
11. नारदभक्तिसूत्रम् - 25
12. तदेव - पृ.41
13. भगवद्गीता - 14.26
14. तदेव - 10.8,9,10,11
15. तदेव - 9.26
16. तदेव - 8.14
17. तदेव - 9.22
18. नारदभक्तिसूत्रम् - 10
19. भगवद्गीता - 9.30,31
20. तदेव -11.53,54
21. भागवतपुराणम् - 11.14. 20,21
22. नारदभक्तिसूत्रम् – "सा त्वस्मिन् परमप्रेमरूपा ।" 2
23. शाण्डिल्यभक्तिसूत्रम् – "सा परानुरक्तिरीश्वरे ।" 1.2
24. तदेव – शांकरभाष्य, पृ. 297
25. तदेव – 18.65
26. भागवतपुराणम् – "श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् ।
27. अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ॥" 7.5.23
28. भगवद्गीता – "भक्तोऽसि मे सखा चेति ।" 4.3
29. तदेव -18.66
30. गोयन्दका जयदयाल ,: श्रीमद्भगवद्गीता; गोरखपुर : गीताप्रेस,सं 2072
31. गोयन्दका ,हरिकृष्णदास : श्रीमद्भगवद्गीता शांकरभाष्य; गोरखपुर : गीताप्रेस,सं 2010
32. पोद्दार, हनुमान प्रसाद : नारदभक्तिसूत्र, गोरखपुर : गीताप्रेस,सं 2008

33. पोद्दार, हनुमान प्रसाद : भागवतपुराणम् (खण्ड- प्रथम, द्वितीय), गोरखपुर : गीताप्रेस,सं 2045
34. सरस्वती,अभयानन्द स्वामी : शाण्डिल्यभक्तिसूत्र, लखनऊ : श्री शौनक सुधा प्रकाशकसमिति, सं 2068